# chaturviMshatimUrtistotram

# ચતુર્વિંશતિમૂર્તિસ્તોત્રમ્

## Document Information

Text title : chaturviMshatimUrtistotram

File name : chaturviMshatimUrtistotram.itx

Category : vishhnu, vishnu, chaturviMshati

Location : doc_vishhnu

Author : Traditional

Proofread by : Sunder Hattangadi

Source : Agnipurana, adhyAya 48

Latest update : January 16, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# ચતુર્વિંશતિમૂર્તિસ્તોત્રમ્

શ્રીભગવાનુવાચ -
ૐરૂપઃ કેશવઃ પદ્મશઙ્ખચક્રગદાધરઃ ।
નારાયણઃ શઙ્ખપદ્મગદાચક્રી પ્રદક્ષિણમ્ ॥ ૧॥

તતો ગદી માધવોઽરિશઙ્ખપદ્મી નમામિ તમ્ ।
ચક્રકૌમોદકીપદ્મશઙ્ખી ગોવિન્દ ઊર્જિતઃ ॥ ૨॥

મોક્ષદઃ શ્રીગદી પદ્મી શઙ્ખી વિષ્ણુશ્ચ ચક્રધૃક્ ।
શઙ્ખચક્રાબ્જગદિનં મધુસૂદનમાનમે ॥ ૩॥

ભક્ત્યા ત્રિવિક્રમઃ પદ્મગદી ચક્રી ચ શઙ્ખ્યપિ ।
શઙ્ખચક્રગદાપદ્મી વામનઃ પાતુ માં સદા ॥ ૪॥

ગદિતઃ શ્રીધરઃ પદ્મી ચક્રશાર્ઙ્ગી ચ શઙ્ખ્યપિ ।
હૃષીકેશો ગદા ચક્રી પદ્મી શઙ્ખી ચ પાતુ નઃ ॥ ૫॥

વરદઃ પદ્મનાભસ્તુ શઙ્ખાબ્જારિગદાધરઃ ।
દામોદરઃ પદ્મશઙ્ખગદાચક્રી નમામિ તમ્ ॥ ૬॥

તેને ગદી શઙ્ખચક્રી વાસુદેવોઽબ્જભૃજ્જગત્ ।
સઙ્કર્ષણો ગદી શઙ્ખી પદ્મી ચક્રી ચ પાતુ વઃ ॥ ૭॥

ગદી ચક્રી શઙ્ખગદી પ્રદ્યુમ્નઃ પદ્મભૃત્પ્રભુઃ ।
અનિરુદ્ધશ્ચક્રગદી શઙ્ખી પદ્મી ચ પાતુ નઃ ॥ ૮॥

સુરેશોઽર્યબ્જશઙ્ખાઢ્યઃ શ્રીગદી પુરુષોત્તમઃ ।
અધોક્ષજઃ પદ્મગદી શઙ્ખી ચક્રી ચ પાતુ વઃ ॥ ૯॥

દેવો નૃસિંહશ્ચક્રાબ્જગદી શઙ્ખી નમામિ તમ્ ।
અચ્યુતઃ શ્રીગદી પદ્મી ચક્રી શઙ્ખી ચ પાતુ વઃ ॥ ૧૦॥

બાલરૂપી શઙ્ખગદી ઉપેન્દ્રશ્ચક્રપદ્મ્યપિ ।

જનાર્દનઃ પદ્મચક્રી શઙ્ખધારી ગદાધરઃ ॥ ૧૧॥

શઙ્ખી પદ્મી ચ ચક્રી ચ હરિઃ કૌમોદકીધરઃ ।
કૃષ્ણઃ શઙ્ખી ગદી પદ્મી ચક્રી મે ભુક્તિમુક્તિદઃ ॥ ૧૨॥

આદિમૂર્તિર્વાસુદેવસ્તસ્માત્સઙ્કર્ષણોઽભવત્ ।
સઙ્કર્ષણાચ્ચ પ્રદ્યુમ્નઃ પ્રદ્યુમ્નાદનિરુદ્ધકઃ ॥ ૧૩॥

કેશવાદિપ્રભેદેન ઐકૈકઃ સ્યાત્ત્રિધા ક્રમાત્ ।
દ્વાદશાક્ષરકં સ્તોત્રં ચતુર્વિંશતિમૂર્તિમત્ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ નિર્મલઃ સર્વમાપ્નુયાત્ ॥ ૧૪॥

ઇત્યાદિમહાપુરાણે આગ્નેયે ચતુર્વિંશતિમૂર્તિસ્તોત્રં
નામ અષ્ટાચત્વારિંશોઽધ્યાયઃ ॥ ૪૮॥

Proofread by Sunder Hattangadi

*chaturviMshatimUrtistotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*